## ओरञ् । (७१/१२८३)

चत्वारोऽर्थाः (४.२.६७–७०) अनुवर्तन्ते । उवर्णान्तात् प्रातिपदिकात् [1]यथाविहितं समर्थविभक्तियुक्तात् अञ् प्रत्ययो भवति तदस्मिन्नस्ति[2] इत्येवमादिष्व[3]र्थेषु । अणोऽपवादः । [4]अरडु – आरडवम् । [5]कक्षतु – काक्षतवम् । कर्कटेलु – कार्कटेलवम् । नद्यां तु परत्वान्मतुब् भवति[6] । [7]इक्षुमती । अञधिकारः प्राक् सुवास्त्वादिभ्योऽणः (४.२.७७/१२८९) ॥

## मतोश्च बह्वजङ्गात् । (७२/१२८४)

बह्वच् अङ्गं यस्यासौ बह्वजङ्गो मतुप्, तदन्तात् प्रातिपदिकात् अञ् प्रत्ययो भवति चातुरर्थिकः । अणोऽपवादः । [8]ऐषुकावतम् । [9]सैध्रकावतम् । बह्वजङ्गात् इति किम् ? [10]आहिमतम् । [11]यावमतम् । अङ्गग्रहणं[12] बह्वजिति [13]तद्विशेषणम् यथा [14]विज्ञायते, [15]मत्वन्तविशेषणं मा [16]विज्ञायि इति । मालावतां[17] निवासो [18]मालावतम् ॥

## बह्वचः कूपेषु । (७३/१२८५)

बह्वचः प्रातिपदिकात् अञ् प्रत्ययो भवति चातुरर्थिकः कूपेष्वभिधेयेषु । अणोऽपवादः । [19]यथासम्भव[20]मर्थाः सम्बध्यन्ते । दीर्घवरत्रेण निर्वृत्तः [21]कूपः दैर्घवरत्रः । [22]कापिलवरत्रः ॥

## उदक् च विपाशः । (७४/१२८६)

[23]विपाशः [24]उत्तरे कूले[25] ये कूपास्तेष्वभिधेयेषु अञ् [26]प्रत्ययो भवति चातुरर्थिकः । [27]अणोऽपवादः । [28]अबह्वजर्थ आरम्भः । दत्तेन [29]निर्वृत्तः कूपः दात्तः । गौप्तः । उदक् इति किम् ? [30]दक्षिणतो विपाशः कूपेषु अणेव । दात्तः । गौप्तः । स्वरे विशेषः । महती सूक्ष्मेक्षिका [31]वर्तते [32]सूत्रकारस्य ॥

## सङ्कलादिभ्यश्च । (७५/१२८७)

[33]कूपेषु इति निवृत्तम् । सङ्कल इत्येवमादिभ्यः अञ् प्रत्ययो भवति चातुरर्थिकः । [34]अणोऽपवादः । यथासम्भवमर्थसम्बन्धः । सङ्गतः कलः सङ्कलः । सङ्कलेन [35]निर्वृत्तः साङ्कलः । पौष्कलः ।

---

1. यथायथं ब. ड. फ ह. 2. इति देशे इत्यधिकम् फ. ह. 3. अर्थेषु नास्ति फ, चतुर्ष्वर्थेषु ड. ह. 4. आरडु ब. ह. 5. कन्तु कान्तवम् फ, कक्रुतु काक्रुतवम् क, कनक्रतु कानक्रतवम् कर्कन्धु कार्कन्धवम् कर्कटलु कार्कटलवम् ककन्दु काकन्दवम् इत्यधिकम् ह. 6. एव इत्यधिकम् फ. 7. द्रुमती क. फ. ह. 8. ऐक्षुकावनम् फ ऐकटावतम् ड. ब, ऐल्कटावतम् इ. 9. सैधृकावतम् क, सैन्धुकावतम् इ. 10. व्रैहिमतम् ब. ह, जाहिमतम्, इत्यधिकम् ब. क. 11. यावमतम् नास्ति फ. 12. किम् इत्यधिकम् क. फ. 13. प्रकृतिविशेषणम् फ. 14. विज्ञायेत ब. इ. ह. 15. मत्वन्तस्य मा भूत् फ. ह, मतुब्विशेषणं इ. 16. विज्ञायेत ब. इ. ह. 17. अयम् इत्यधिकम् ग. 18. मालावती ह, मालवती ब. 19. अत्र इत्यधिकम् ड. 20. अर्थसम्बन्धः इ.फ. 21. दैर्घवरत्रः कूपः फ. इ. क. 22. कोपिलवरत्रः ह. 23. देशे तन्नाम्नि इति वर्तते इत्यधिकम् ह. 24. उत्तरे नास्ति ड. 25. ये नास्ति ब. 26. एव इत्यधिकम् ड. 27. अणोऽपवादः नास्ति ब. ड. फ. 28. अबह्वर्थः इ. 29. निवृत्तः इ. 30. दक्षिणतीरे ह. 31. वर्तते नास्ति ह. 32. सूत्रकारस्य नास्ति ब. ड. फ. ह. 33. वाक्यमिदं नास्ति फ. 34. अणोऽपवादः नास्ति फ. 35. निवृत्तं साङ्कलम् पौष्कलं क. ब.